**अर्कबन्धु** पु० अर्कस्य बन्धुरिव । १गौतमे सूर्य्यवंश्ये बौद्धभेदे । तस्य तत्कुलोत्पन्नत्वात्तद्बन्धुत्वम् । अर्कस्य बन्धुरिव प्रकाश्यत्वात् । २पद्मे । अर्कबान्धवोऽप्युभयत्र ।

**अर्कभ** न० अर्काक्रान्तं भं नक्षत्रं शा०त० । १सूर्य्याक्रान्ते नक्षत्रे ६त० । तत्स्वामिके २सिंहराशौ ३उत्तरफल्गुनीनक्षत्रे च ।

**अर्कभक्ता** स्त्री अर्कस्य भक्ता (हुड़हुड़िया) इति ख्यातायां लतायाम् । तत्किरणसंपर्के एव हि तस्याः सौन्दर्य्यम् ।

**अर्कमूल** पु० अर्क इव सर्पाणां दुष्प्रसहं मूलं यस्याः । (इशेरमूल) इति ख्यातायां लतायाम् ।

**अर्कलूष** पु० अर्क इव रूष उग्रः रस्य लः । ऋषिभेदे विदा० अञ् । आर्कलूषः तदपत्ये पुंस्त्री० । स्त्रियां ङीप् ।

**अर्कवल्लभ** पु० अर्कस्य वल्लभः समानवर्णपुष्पत्वात् । रक्तपुष्पत्वेन अर्कतुल्यपुष्पे बन्धूकवृक्षे । ब० । २पद्मे ।

**अर्कविवाह** पु० अर्कवृक्षस्य कन्यात्वेन प्रकल्पनेन विवाहः । तृतीयविवाहसिद्ध्यर्थमर्कवृक्षस्य कन्यात्वकल्पनेन विहिते विवाहभेदे । "चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत् । "आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे । शुभे दिने वा पूर्व्वाह्णे कुर्य्यादर्कविवाहकम्" कश्य० । "तृतीये स्त्रीविवाहे तु संप्राप्ते पुरुषस्य तु । आर्कं विवाहं वक्ष्यामि शौनकोऽहं विधानतः" शौनकः । तत्प्रकारस्तु विधानपारिजाते तृतीयविवाहप्रकरणे दृश्यः ।

**अर्कवेध** पु० अर्कस्य वृक्षस्येव वेधोऽत्र । तालीशपत्रे वृक्षे ।

**अर्कव्रत** पु० अर्कस्याराधनार्थं व्रतम् । माघशुक्लसप्तम्यादौ कर्त्तव्ये अर्काराधनार्थे १व्रते । अर्कस्येव व्रतम् नियमः । "सहस्रगुणमुत्स्रष्टुमादत्ते हि रसान् रविः" इत्युक्तेर्यथा रविणा लोकवृद्ध्यर्थं रसस्य ग्रहणमेवं प्रजापालनार्थमेव राज्ञा प्रजाभ्यो यत् करस्य ग्रहणं क्रियते तादृशे "अष्टौ मासान् यथादित्यस्तोयं गृह्णाति रश्मिभिः । तथा हरेत् करं राष्ट्रान्नित्यमर्कव्रतं हि तदिति" मनूक्ते राज्ञः २करादानभेदे ।

**अर्कसूनु** पु० ६त० । १यमे २शनैश्चरे ३सुग्रीवे ४कर्णे ५श्राद्धदेवे ६अश्विनोकुमारयोः द्वि०व० । ७यमुनायां ८तपत्याञ्च स्त्री

**अर्कसोदर** पु० अर्कस्य इन्द्रस्य सोदर इवोपकारकत्वात् । १ऐरावते हस्तिनि २अर्कतुल्ये दुर्द्दर्शे च ।

**अर्कहिता** स्त्री ६त० । १अर्कभक्तायां (हुड़हुड़िया) लतायाम् २सूर्य्यहितकरे त्रि० ।

**अर्काश्मन्** पु० अर्कस्य अनुगतः, अश्मा । सूर्य्यकान्तमणौ, स हि सूर्य्यरश्मिसंपर्कादुज्ज्वलति ततस्तस्यार्कसम्बन्धित्वम् । अर्क इव रक्तः अश्मा । (चुनी) २अरुणोपले ।

**अर्किन्** त्रि० अर्च्यतेऽनेन मन्त्रेण अर्कोऽर्चनहेतुमन्त्रः सोऽस्यास्ति इनि । अर्चनसाधनमन्त्रयुक्ते । "बृहदिन्द्रमर्केभिरर्किणः" ऋ० १,७,१, 'अर्किणः अर्चनहेतुमन्त्रोपेताः' भा० "गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः । ऋ० १,१०, १, । अर्कोऽर्चनमस्त्यस्य इनि । २अर्चनयुक्ते त्रि० । "वन्दस्व मारुतं गणं त्वेषम् अपनस्युमर्किणम्" ऋ० १,३८,१५ । अर्किणम् अर्चनोपेतम् भा० ।

**अर्केन्दुसङ्गम** पु० अर्कः इन्दुश्च सङ्गच्छेते यत्र । अमावास्यायां तिथौ तद्दिने हि सूर्य्याचन्द्रमसोरेकराश्येकावच्छेदेन उपर्य्यधोभावेन स्थितिः ज्योतिषप्रसिद्धा 'सूर्य्याचन्द्रमसोर्यः परः सन्निकर्षः साऽमावास्येति" गोभिलेन तस्यास्तथाविधत्वकीर्त्तनात् तथात्वम् । [पद्मरागे च ।

**अर्कोपल** पु० अर्कस्यानुगतउपलः । १सूर्य्यकान्तमणौ (चुनी)

**अर्क्य** त्रि० अर्च-कर्म्मणि ण्यत् कुत्वम् । १अर्चनीये । अर्कस्यायम् यङ् । अर्क्यः अर्कसम्बन्धिनि । "स एष वार्कीय एष तपति तस्यैतदन्नं क्यमेष चन्द्रमार्क्यम्" शत०ब्रा० ।

**अर्गल** स्त्रीन० अर्ज्ज-कलच् न्यङ्क्वा० कुत्वम् । १कपाटमध्यस्थेरोधके १काष्ठादिदण्डे, "ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती" का०प्र० । "पुरार्गलादीर्घभुजा बुभोज" रघुः, 'अथानपोढ़ार्गलमप्यगारमिति" रघुः । सप्तशतीस्तोत्रस्यादौ पाठ्ये २स्तोत्रविशेषे "अर्गलां कीलकं चादौ पठित्वा कवचं पठेत् । जपेत् सप्तशतीं पश्चात्" मत्स्यसूक्तम् । ३कल्लोले, ४कपाटे च न० ५क्षुद्रार्गले स्त्री । गौरा० ङीष् स्वार्थे कन् । अर्गलिकाप्यत्रार्थे । ६विष्कम्भमात्रे रोधकमात्रे स्त्रीन० ॥ वार्य्यर्गलाभङ्ग इव प्रवृत्तः" रघुः । अनुगतनयमार्गामर्गलां दुर्नयस्य" माघः । [वृक्षे

**अर्गबध** पु० आरगबधः पृ० । आरग्वधे (सिंधालि)

**अर्घ** मूल्ये भ्वादि० पर० सक० सेट् । अर्घति आर्घीत् । आनर्घ । अर्घः । अर्घ्यः ।

**अर्घ** पु० अर्घ-घञ् । क्रेयवस्तुग्रहणार्थं देये तुल्यरूपे रजतादिद्रव्यरूपे १मूल्ये । "कुर्व्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः" "कुर्य्युरर्घं यथापण्यमिति" च मनुः अर्ह-करणे घञ् न्यङ्क्वादित्वात् कुत्वम् । २पूजोपचारे दूर्व्वाक्षतादौ । सामगैरयं सयकारः क्लीवलिङ्गश्च प्रयोक्तव्यः अन्यैः पुंलिङ्गोनिर्यकारश्च । अर्घाय देयम् यत् । अर्घ्यम् पूजार्थं देये जलादौ अर्घद्रव्याणि च "आपः क्षीरं